भारतमञ्जरी/सौप्तिकपर्व

< भारतमञ्जरी

सौप्तिकपर्व

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ११.१ ॥

प्रतापधाम्नि यातेऽस्तं रवौ कमलिनीप्रिये ।

शोकावकीर्णकेशेन तमोभिरभवन्मही ॥ ११.२ ॥

क्षयं कालेन नीतेऽह्नि शान्ते संध्याचितानले ।

अस्थिशेषैरिवापूर्णं तारकाभिरभून्नभः ॥ ११.३ ॥

श्यामा प्रत्यग्रदुःखेन प्रसरत्तिमिराञ्जना ।

बभार तारतरलां नक्षत्राश्रुकणावलीम् ॥ ११.४ ॥

घोरे तस्मिन्निशावक्त्रे घोरसत्त्वघने वने ।

श्रमान्निद्रामुपगते कृपे स कृतवर्मणि ॥ ११.५ ॥

ध्यायन्दुर्योधनवधं मन्युहालाहलाकुलः ।

प्रतिज्ञां शत्रुनिधने द्रौणिरेको व्यचिन्तयत् ॥ ११.६ ॥

अत्रान्तरे ददर्शोच्चन्यग्रोधशिखराश्रयम् ।

वध्यमानमुलूकेन वायसानां च मण्डलम् ॥ ११.७ ॥

काकान्कालबलेनैत्य दृष्ट्वा घूकेन पातितान् ।

तामेव पाण्डववधे नीतिं द्रौणिरचिन्तयत् ॥ ११.८ ॥

क्रुधा क्रूरां धियं कृत्वा कृपभोजौ विबोध्य सः ।

उवाच निःश्वसन्दीर्घं दह्यमान इव क्रुधा ॥ ११.९ ॥

राजा राजसहस्राणामेकाकी विषमस्थितिः ।

व्याजादस्मासु जीवत्सु भीमसेनेन पातितः ॥ ११.१० ॥

शस्त्रं वहद्भिर्मिथ्यैव दृष्टोऽस्माभिः स भूतले ।

अश्रुपातप्रतीकाराक्षमैः क्लीबतरैरिव ॥ ११.११ ॥

देशकालौ समाश्रित्य वध्यः सर्वात्मना रिपुः ।

तस्मात्प्रसुप्तानद्यैव सानुगान्हन्मि पाण्डवान् ॥ ११.१२ ॥

श्रुत्वैतत्कूणितमनाः प्रसुप्तवधपातकम् ।

कृपः कृपाकुलो निन्दन्नभाषत सुतं स्वसुः ॥ ११.१३ ॥

धिगेतत्कुत्सितं युद्धं निश्चेष्टो यत्र हन्यते ।

भग्नधैर्येऽपि नो वीराः प्रहरन्ति यशस्विनः ॥ ११.१४ ॥

भवानहं च भोजश्च कर्तारः प्रातरेव तत् ।

पुनर्येन न यास्यामो दुर्योधनवधव्यथाम् ॥ ११.१५ ॥

सुराणामपि पर्याप्ताः संहताः समरे वयम् ।

प्रवेक्ष्यामो वैरिवनं ज्वलिता इव पावकाः ॥ ११.१६ ॥

गौतमेनेत्यभिहिते संमते कृतवर्मणः ।

निःश्वसन्साश्रुन्यनः पुनर्द्रौणिरभाषत ॥ ११.१७ ॥

मायोपमा विदग्धेषु निकृत्याविचरस्तु ये ।

स्पृशन्त्यधर्ममर्यादां न ते तत्फलभागिनः ॥ ११.१८ ॥

अर्जुनेन हतः कर्णः स च शान्तनवो यथा ।

तत्किं न विदितं लोके शेषं वक्तुं न पार्यते ॥ ११.१९ ॥

अधुना स्वस्ति धर्माय रचितोऽस्मै मयाञ्जलिः ।

पराभवमिमं तावन्न सहे मर्मदारणम् ॥ ११.२० ॥

द्रौणिर्दारुणसंकल्पमित्युक्त्वा कृतनिश्चयः ।

रथेन तमसि प्रायाच्छिबिरं कौरवद्विषम् ॥ ११.२१ ॥

कृष्णस्य शासनात्पूर्वं यातेषु शिबिरान्तरम् ।

सह सात्यकिना योधैः पाण्डवेषु विनानुगैः ॥ ११.२२ ॥

कृपभोजावतिक्रम्य जवाद्द्रौणिरुपागतः ।

शिबिरद्वारमासाद्य महद्भूतं व्यलोकयत् ॥ ११.२३ ॥

हरिश्मश्रुजटानेत्रं ज्वालानामिव संचयम् ।

तमसामिव संघातमञ्जनाचलसंनिभम् ॥ ११.२४ ॥

सहस्रशीर्षनयनं सहस्रचरणाद्भुतम्।

सर्पयज्ञोपवीताङ्गं सर्पकेयूरकङ्कणम् ।

भयंकरं भयस्यापि कृतान्तस्येव दैवतम् ॥ ११.२५ ॥

तद्दृष्ट्वा घोरसंरम्भो द्रौणिर्दुर्जयविक्रमः ।

सर्वायुधावली तस्मै प्राहिणोद्धैर्यभूधरः ॥ ११.२६ ॥

तान्यायुधानि सहसा ज्वलितान्येव तेजसा ।
बृम्भमाणं महद्भूतं तदासाद्य क्षयं ययुः ॥ ११.२७ ॥
द्रौणिस्ततस्तदाकारमरीचिभ्यो व्यलोकयत् ।
चक्रायुधसहस्राणि निःसृतानि स विस्मयः ॥ ११.२८ ॥
क्षणाद्ग्रस्तायुधस्तेन गाढानुशयतापितः ।
प्रस्तुतं मलिनं कर्म निनिन्द स्वयमाकुलः ॥ ११.२९ ॥
स रथादवतीर्याथ प्रयतस्त्रिपुरान्तकम् ।
शूलिनं शरणं प्रायात्तत्स्तोत्रमुखराननः ॥ ११.३० ॥
आत्मोपहारं रुद्राय तस्मिन्दातुं समुद्यते ।
ज्वालाकुला हेमवेदी पुरस्तात्प्रत्यदृश्यत ॥ ११.३१ ॥
तदुद्भूतैर्गणैर्घोरैर्नानाप्राणिमुखोदरैः ।
नानाप्रहरणैर्दीप्तैर्व्योम क्षिप्रमपूरयत् ॥ ११.३२ ॥
ततो वेद्यां महावह्नौ ज्वलिते द्रोणनन्दनः ।
भक्त्यात्मानं त्रिनेत्राय निवेद्याभ्यपतत्स्वयम् ॥ ११.३३ ॥
तुष्टोऽथ भगवानेत्य स्वयमन्धकसूदनः ।
तमुवाच स्वमेवांशमुत्तिष्ठाङ्गिरसां वर ॥ ११.३४ ॥
संस्थानाय मयैतावत्कृतं कैटभविद्विषः ।
आत्मानं विद्धि मे कृष्णं स मे बहुमतः सदा ॥ ११.३५ ॥
कालपक्वास्तु पाञ्चाला नैषां रक्षास्ति कुत्रचित् ।
गृहाण खड्गमेतेन दारयैतानशङ्कितः ॥ ११.३६ ॥
इत्युक्त्वा भैरवे दीप्तं खड्गं दत्वा तिरोहिते ।
तदा विकाराद्दुष्प्रेक्ष्यो द्रौणिः शिबिरमाविशत् ॥ ११.३७ ॥
द्वारि भोजकृपौ धृत्वा विद्रुतानां वधाय सः ।
प्रविश्य शयने शुभ्रे धृष्टद्युम्नं व्यलोकयत् ॥ ११.३८ ॥
तारहारांशुनखरं दीप्तकेसरिसंनिभम् ।
घूर्णमानशिखैर्दीपैर्विस्मयादिव वीक्षितम् ॥ ११.३९ ॥
अनेकरणसंमर्दश्रान्तैर्निद्राविमोहितैः ।
अधिष्ठितं बहुभटैर्मुक्तपर्याणवाहनैः ॥ ११.४० ॥
तं दृष्ट्वा कोपशिखिना दह्यमानः स्मरन्पितुः ।
उत्तिष्ठ रे गुरुघ्नेति द्रौणिरुक्त्वा पदास्पृशत् ॥ ११.४१ ॥

बोधितः सहसा तेन संभ्रमस्वीकृतायुधः ।

द्रोणपुत्रं परिज्ञाय चकम्पे द्रुपदात्मजः ॥ ११.४२ ॥

द्रौणिस्तमुत्थितं वेगान्माल्यवद्भिः शिरोरुहैः ।

आकृष्यापातयत्कण्ठे गाढं निष्पीड्य विह्वलम् ॥ ११.४३ ॥

निष्पिष्यमाणः संरम्भाद्रक्तोद्गाराकुलाननः ।

कुपित्वा पादयोर्द्रौणिं नखैर्दन्तैश्च विस्फुरन् ॥ ११.४४ ॥

शस्त्रेण छिन्धि मां तूर्णं मा पदेनेति गद्गदम् ।

कण्ठरुद्धस्वरः श्वासादस्फुटाक्षरमभ्यधात् ॥ ११.४५ ॥

तमब्रवीद्द्रोणसुतः पाप पद्भ्यां निहन्यसे ।

लोकानां शस्त्रपूतानां न पापं गुरुघातिनाम् ॥ ११.४६ ॥

इत्युक्त्वा चरणाघातैर्जर्जरं तमपोथयत् ।

तस्मिन्हते तद्विमर्दशब्देन बुबुधे जनः ॥ ११.४७ ॥

▪ ▪ ▪ ▪ ▪ धृष्टद्युम्नवधः ॥ १ ॥ *****

ततो द्रौणिं समालेक्य रिपुरक्तच्छटाङ्कितम् ।

पाञ्चाला द्रौपदेयाश्च कालोऽयमिति मेनिरे ॥ ११.४८ ॥

निद्राशेषारुणदृशां शस्त्राण्यानयतां मिथः ।

क्रोशतां वर्म वर्मेति तेषामासीन्महास्वनः ॥ ११.४९ ॥

क्व गजः क्व रथः क्वाश्वः क्व चापं क्व शिलीमुखाः ।

इति ब्रुवाणान्खड्गेन द्रौणिश्चिच्छेद तान्क्रुधा ॥ ११.५० ॥

हत्वोत्तमौजसं पद्भ्यां कण्ठे कठिनविक्रमः ।

गदाहस्तं युधामन्युं निष्पिपेष विराविणम् ॥ ११.५१ ॥

ततः खड्गेन शूराणां शिरांसि भुवि पातयन् ।

कालरात्र्याः स विदधे विनोदं कन्दुकैरिव ॥ ११.५२ ॥

कृष्णासुतानापततो द्रौपदेयानसंभ्रमात् ।

चकार करवालेन स कालकवलोचितान् ॥ ११.५३ ॥

प्रतिविन्ध्ये हते वीरे सुतसोमे निपातिते ।

श्रुतकीर्तौ शतानीके छिन्ने च श्रुतवर्मणि ॥ ११.५४ ॥

शिखण्डी कृष्टकोदण्डः शरैर्द्रौणिमपूरयत् ।

द्रोणपुत्रोऽपि खड्गेन क्रुद्धस्तं विदधे द्विधा ॥ ११.५५ ॥

■ ■ ■ ■ ■ द्रौपदेयशिखण्डिवधः ॥ २ ॥ *****

कोपादाचार्यपुत्रेण वध्यमानाः प्रभद्रकाः ।

मत्स्यसृञ्जयपाञ्चालाः कालं ददृशुरन्तिके ॥ ११.५६ ॥

असितं रक्तवसनं रक्तमाल्यानुलेपनम् ।

हसन्तं वीक्ष्य तं वीराः संहारं मेनिरे स्फुटम् ॥ ११.५७ ॥

घनान्धकारे वीराणां रथकुञ्जरवाजिनाम् ।

योधानां च क्षयं द्वारि चक्रतुर्भोजगौतमौ ॥ ११.५८ ॥

एवमक्षौहिणीं हत्वा वसारक्तानुलेपनः ।

निर्ययौ रौद्रचरितो द्रौणिर्भैरवविग्रहः ॥ ११.५९ ॥

स गत्वा सहितस्तूर्णं हार्दिक्येन कृपेण च ।

ददर्श भुवि राजानं भग्नशक्तिं सुयोधनम् ॥ ११.६० ॥

वारयन्तं गदाग्रेण मुहुः क्रव्यादमण्डलम् ।

व्यथया मर्मदिन्या भक्षयन्तं वसुंधराम् ॥ ११.६१ ॥

शोणितं वदनोद्वान्तं परिमृज्याशु तस्य ते ।

सर्वपाञ्चलसंहारकथया ववृषुः सुधाम् ॥ ११.६२ ॥

स किंचिच्छेषजीवोऽपि तच्छ्रुत्वा वृत्तकन्धरः ।

पर्यन्तग्रसिताव्यक्तभाषितैः प्रशशंस तान् ॥ ११.६३ ॥

स परिष्वज्य यत्नेन द्रौणिं साश्रुविलोचनम् ।

पुनर्नः संगमः स्वर्गे भूयादित्यवदच्छनैः ॥ ११.६४ ॥

अङ्के विधाय दयितां स गदां सदैव भुक्तां चिरं वसुमतीमवगूह्य दोर्भ्याम् ।

कर्णावलम्बितबलोद्गतजीवचारो वीरः शनैः सुरवधूप्रणयी बभूव ॥ ११.६५ ॥

■ ■ ■ ■ ■ दुर्योधनस्वर्गगमनम् ॥ ३ ॥ *****

अत्रान्तरे प्रयातायां क्षपायां क्षपितारयः ।

जज्ञिरे पाण्डवाः कर्म दारुणं द्रौणिना कृतम् ॥ ११.६६ ॥

मुक्तान्महाभयात्तस्मात्कृष्णा श्रुत्वा हतान्सुतान् ।

अनुजांश्च सपाञ्चालान्पपात भुवि मूर्च्छिता ॥ ११.६७ ॥

शनकैर्लब्धसंज्ञा सा विलपन्ती सुलोचना ।

पार्थानां शोकविधुरा हृदयानि व्यदारयत् ॥ ११.६८ ॥

यावन्न विशिखैः कृत्तमुत्तमाङ्गं विकर्मणः ।

द्रौणेर्दृष्टं मया तावज्जीवितस्यायमञ्जलिः ॥ ११.६९ ॥

इत्युक्त्वा द्रौपदी दुःखाद्वीक्षमाणा वृकोदरम् ।

नोवाच किंचित्संतापान्मरणे कृतनिश्चया ॥ ११.७० ॥

ततो भीमः प्रियाशोकशूलेनाभ्याहतो हृदि ।

प्रययौ रथमारुह्य द्रोणपुत्रजिघांसया ॥ ११.७१ ॥

व्रजतस्तस्य कालग्नेरिव लोकान्दिधक्षतः ।

धूममालाभ्रमं चक्रे ललाटे भ्रुकुटिः क्षणम् ॥ ११.७२ ॥

रौद्रो रुद्राश्रयो द्रौणिः क्रुद्धश्च पवनात्मजः ।

गच्छामः पृष्ठतस्तस्मादित्यूचे पाण्डवान्हरिः ॥ ११.७३ ॥

ततः किरीटिप्रमुखाः सह सात्यकिना ययुः ।

रथिनः सेषवः सर्वे पाण्डुपुत्रा युयुत्सवः ॥ ११.७४ ॥

ततस्ते द्रौणिमासाद्य प्रसुप्तवधपातकात् ।

ध्वस्तच्छायं क्रियाहीनं कोपेनाकुलतां ययुः ॥ ११.७५ ॥

अभिद्रुते भीमसेने द्रौणिं नकुलसारथौ।

पादचारी घृताभ्यक्तः सरस्वत्यास्तटे क्षणम् ।

अपाण्डवं जगत्कर्तुं ब्रह्मशीर्षास्त्रमाददे ॥ ११.७६ ॥

तद्विनाशाय पार्थोऽपि ब्रह्मास्त्रमसृजत्कृती ।

येनाभवन्दिशो व्याप्ताः कम्पातङ्कतरङ्गिताः ॥ ११.७७ ॥

अत्रान्तरे समभ्यायान्नारदेन सह स्वयम् ।

मुनिः सत्यवतीसूनुर्भगवान्भूतभावनः ॥ ११.७८ ॥

सोऽब्रवीद्द्रोणतनयं जिष्णुं च क्षयशङ्कितः ।

अयं दिव्यास्त्रसंमर्दे हतवीरं जगद्दहेत् ॥ ११.७९ ॥

पार्थ संहर दिव्यास्त्रं त्वं च द्रौणे गिरा मम ।

अकाण्डे मा भवन्त्वेते लोकाः प्रलयभागिनः ॥ ११.८० ॥

इत्युक्ते मुनिना क्षिप्रं संजहारास्त्रमर्जुनः ।

द्रौणिः प्रयोगकुशलो नेशोऽभूदस्त्रसंहृतौ ॥ ११.८१ ॥

ततः प्रज्वलिते लोके व्यथिते सुरमण्डले ।

अभिमन्युवधूगर्भे द्रौणिरस्त्रमपातयत् ॥ ११.८२ ॥

भूयस्तत्प्रतिषेधाय पुत्रसंतानवाञ्छया ।

निन्दन्द्रोणसुतं पार्थस्तदस्त्रं कुपितोऽसृजत् ॥ ११.८३ ॥

ततः कृष्णोऽवदज्जिष्णुं विषण्णं संततिक्षयात् ।

मा शुचो धैर्यजलधे न ते वंशो विनङ्क्ष्यति ॥ ११.८४ ॥

जात्वेनं जीवयिष्यामि दग्धमप्यस्त्रतेजसा ।

उत्तरायाः स्थितं गर्भे सौभद्रतनयं शिशुम् ॥ ११.८५ ॥

इति ब्रुवाणे गोविन्दे पार्थास्त्रे ज्वलिते भुवि ।

उवाच द्रोणतनयं व्यासो देवर्षिणा सह ॥ ११.८६ ॥

त्यज चूडामणिं रक्ष जीवरत्नं महास्त्रतः ।

अशक्तश्च प्रमादी च जानीषे न यथोचितम् ॥ ११.८७ ॥

वत्सराणां सहस्र त्वं विस्ररोगी समाहितः ।

दुर्भिक्षव्यञ्जको दुःखी विजने विचरिष्यसि ॥ ११.८८ ॥

इति शप्तो गुरुसुतः कोपाद्व्यासमभाषत ।

व्यसने पतितः कस्मात्क्षिप्तोऽहं संकटे त्वया ॥ ११.८९ ॥

यत्र यत्र भविष्यामि तत्र तत्र ममानुगः ।

त्वमपि प्रतिशापेन मुने नित्यं भविष्यसि ॥ ११.९० ॥

इत्युक्त्वास्त्रोपहाराय चूडारत्नं वितीर्य सः ।

प्रययौ द्रोणतनयो मुनिश्च मुनिना सह ॥ ११.९१ ॥

ततः प्रशान्ते ब्रह्मास्त्रे पाण्डवाः सह शौरिणा ।

चूडारत्नं समादाय याज्ञसेन्यै न्यवेदयन् ॥ ११.९२ ॥

▪ ▪ ▪ ▪ ▪ ऐषीकमस्त्रम् ॥ ४ ॥ *****

एवं प्रसाद्य पाञ्चालीं शोकार्ताः पाण्डुनन्दनाः ।

पाञ्चालकदनं घोरं ध्यायन्तो न ययुर्वृतिम् ॥ ११.९३ ॥

संजयेनेति कथिते श्रुत्वा राजाम्बिकासुतः ।

पपात मूर्च्छितो मोहाल्लीनशोकानलः क्षणम् ॥ ११.९४ ॥

तं शीतसलिलापूरैराश्वास्योवाच संजयः ।

मन्त्रिणश्च प्रियान्पुत्राञ्शोचन्तं व्यथितेन्द्रियम् ॥ ११.९५ ॥

स्वप्नमायाविलसितैः पर्यन्ते शोकमोहदैः ।

संसारविभ्रमैर्धीराः स्पृश्यन्ते न मनीषिणः ॥ ११.९६ ॥

देवैन्द्रजालिककृतैश्छायाक्रीडनकैरिव ।

पुत्रैर्धनैश्च दारैश्च न मुह्यन्ति मदाशयाः ॥ ११.९७ ॥

उपेक्षितस्त्वयैवायं दुर्नयाद्बान्धवक्षयः ।

वृत्ते तस्मिन्नमिथ्यैव शोकं कर्तुमिहार्हसि ॥ ११.९८ ॥

प्रभावप्रभवैर्भावैर्मायाविभवभावितैः ।

अभावनिष्ठापर्यन्तैः सतां न क्रियते भ्रमः ॥ ११.९९ ॥

स्वकर्ममुद्रिते लोके नियतौ प्रलयोदधौ ।

कलयामि न कालस्य कश्च तावति वर्तते ॥ ११.१०० ॥

इत्यादि संजयमुखा नृपमुग्रमोहभग्नं स्वयं विहितदुर्नयदृष्टपारम् ।

हेलावलत्कलभचञ्चलकर्णताललोलां भवस्थितिकथामसकृत्तमूचुः ॥ ११.१०१ ॥

इति क्षेमेन्द्रविरचितायां भारतमञ्जर्यां सौप्तिकपर्व

"https://sa.wikisource.org/w/index.php?title=भारतमञ्जरी/सौप्तिकपर्व&oldid=101997" इत्यस्माद् पुनः प्राप्तिः

- ३१ जनवरी २०१७ (तमे) दिनाङ्के अन्तिमसम्पादनं ०७:४८ समये अभवत्
- पाठः क्रियेटिव कॉमन्स ऐट्रिब्यूशन/शेयर-अलाइक अभिज्ञापत्रस्य अन्तर्गततया उपलब्धः अस्ति; अन्याः संस्थित्यः अपि सन्ति । अधिकं ज्ञातुम् अत्र उपयोगस्य संस्थितिं पश्यतु ।